V. 40. C शूद्राः प्रायो धनाढ्याः 140. A gap for -गी मृत्यु
180. E नग 210. A B E अंशुभिः

| *Days* | *Vakya* | *r o ,* | *Samskara-varna* | | |
|---|---|---|---|---|---|
| 220 | सम्राड्भोग्यो भूपिण्डः | 4 14 27 | —1 | —2½ | |
| 230 | देवो गिरिविष्टरः | 4 23 48 | —½ | —2 | |
| 238 | मूर्खो नूनं शिष्टभुक् | 5 0 25 | —½ | —2 | |
| 246 | विरतिज्ञो मुनीन्द्रः | 5 6 24 | +0 | —2 | |
| 222 | दाननित्यो मुनीन्द्रः | 5 10 8 | +0 | —2 | |
| 258 | धीमान् श्रीकामो नरः | 5 12 59 | —0 | —2 | |
| 264 | शोभाभृत् कामज्ञोष्ठः | 5 14 45 | +0 | —1½ | |
| 270 | जनैर्मान्यो मुनीन्द्रः | 5 15 8 | +0 | —2 | (वक्रः) |
| 276 | हिमालये मुनीन्द्रः | 5 13 58 | +0 | —2 | |
| 282 | मुनीड्यः पद्मनेत्रः | 5 11 5 | +0 | —2 | |
| 287 | | | | | (अस्तम्) |
| 288 | वनस्थाने मुनीन्द्रः | 5 7 4 | +0 | —2 | |
| 296 | सीरी पानमग्नोष्ठः | 5 1 27 | —0 | —1½ | |
| 197 | | | | | (उदयः) |
| 302 | रागदं रम्भान नम् | 4 28 32 | —0 | —0 | |
| 308 | सेनासारोऽवनीड्यः | 4 27 7 | —0 | —1 | (निवृत्तिः) |
| 314 | अरिस्संखे विनष्टः | 4 27 20 | —0 | —½ | |
| 320 | पानधीरघनष्टः | 4 29 1 | —0 | —½ | |
| 326 | शुभा यूनां मानिनी | 5 1 45 | —0 | +0 | |
| 332 | अङ्के मेना मनोज्ञा | 5 5 30 | +0 | +0 | |
| 338 | धर्मो धनं मुनीनाम् | 5 9 59 | +0 | +0 | |
| 346 | जाया तोष्याशनेन | 5 16 18 | +0 | —0 | |
| 354 | ईशो गिरीमुष्टिज्ञः | 5 23 50 | —½ | —0 | |
| 364 | गविलग्नस्तपनः | 6 3 43 | —1 | —0 | |
| 374 | सेव्यो भूपश्चापज्ञः | 6 14 17 | —1 | —0 | |

V. 220. C सता for सम्राट् . A B D भूपो for भोग्यो
238. A कृत् and B रुत् for भुक्
288. C मग्नसेना मग्नोऽरिः; D सारधीशो (य cor. to धी); E विन्नः सेनामग्नोऽरिः
296. A B D सारयशो मुनीन्द्रः 374. A B D E स्तव्यो

| Days | Vākya | r | o | , | Saṁskāra-varṇa | |
|---|---|---|---|---|---|---|
| 389 | देवो नूनं सुष्टुज्ञः | 7 | 0 | 48 | —1½ | —0 |
| 404 | प्रिया जाया सुखकृत् (?का) | 7 | 18 | 12 | — 2 | +1 |
| 424 | वनाद्रयोऽहिकुण्ठाः | 8 | 12 | 4 | — 1 | +1½ |
| 444 | क्षुद्रा स्तेना धीकुण्ठाः | 9 | 6 | 26 | — 1 | +1½ |
| 474 | ज्ञानश्लाघ्या नृपनयाः | 10 | 13 | 0 | — 0 | + 1 |
| 504 | विश्वाधिकाः कृपानिघ्नाः | 11 | 19 | 44 | — 0 | — 0 |
| 544 | स्तनो धनं कन्यानाम् | 1 | 9 | 6 | + 1 | + 0 |
| 554 | | | | | | ( अस्तम् ) |
| 584 | दनुजश्रेष्ठः काव्यः | 2 | 28 | 8 | + 1 | — 1 |

(⊕ वाक्यं 39. 'मनुः' ♂ (5) भृगोः)

आद्यन्तवाक्यप्रमाणं 'मधुकः' (195)

॥ इति शुक्रस्य महावाक्यं समाप्तम् ॥

—:0:—

V. 389. B om. the vākya.
504. C E धिकः. C E निघ्नः
544. E स्तनौ 584. A B D दनुजाः श्रेष्ठाः काव्याः. C श्रेष्ठः
⊕ D adds : पञ्चमपरिवृत्ति- ♂ C मुनि

# शनेर्महावाक्यानि

## परिवृत्तिः I

| *Days* | *Vākya* | *r o ,* | *Saṁskāra-varṇa* |
|---|---|---|---|
| 15 | | | (उदयः) |
| 30 | चारो धीरोऽसितः | 7 29 26 | — 6 |
| 60 | निन्द्यः प्राज्ञैर्हासः | 8 2 10 | — 7 |
| 85 | सेवालभ्यो दासः | 8 3 47 | — 7 |
| 110 | जलभग्नो दाहः | 8 4 38 | — 8 |
| 130 | अघभग्नो देहः | 8 4 40 | — 8 (वक्रः) |
| 150 | सन्नो घनैर्दाहः | 8 4 7 | — 8 |
| 165 | जरालग्नो देहः | 8 3 28 | — 8 |
| 175 | अवीरो न देहः | 8 2 40 | — 8 |
| 185 | रोमपीनो देहः | 8 1 52 | — 8 |
| 193 | लव्यो यज्ञार्होजः | 8 1 13 | — 8 |
| 203 | हरिर्नानादेहः | 8 0 28 | — 8 |
| 213 | जम्भो धीरोत्साहः | 7 29 48 | — 8 |
| 228 | राज्ञां धरोत्साहः | 7 29 2 | — 8 |
| 248 | खरो दुरासदः | 7 28 22 | — 8 (निवृत्तिः) |
| 268 | जलदा रसेच्छाः | 7 28 38 | — 7 |
| 293 | नागो धरासंस्थः | 7 29 30 | — 7 |
| 318 | सेनाढ्यो न दुःस्थः | 8 1 7 | — 7 |
| 348 | शमलीनो हंसः | 8 3 55 | — 7 |

---

I. 30. A B D E चरधीरो 130. C E अघभृन्निर्दाहः
175. A B D मुखर्दो and C अघाद्रो for अवीरो
193. C गव्यो यज्ञ ददुः 213. A B धीरस्सहः; E धीरसहः
268. C D E जलदो रसेच्छुः 293. E नगो
348. A B शाब and D शब for शम

| *Days* | *Vākya* | *r o ,* | *Saṁskāra-varṇa* |
|---|---|---|---|
| 363 | | | ( अस्तम् ) |
| 378 | अरिच्छिन्नो दुःस्थः | 8 7 20 | — 7 |

( ꣸वाक्यं 19. 'यज्ञः' (1) शनेः )

## परिवृत्तिः II

| | | | |
|---|---|---|---|
| 15 | | | (उदयः) |
| 30 | गर्वनित्यो हासः | 8 10 43 | — 7 |
| 60 | रुद्रः श्लाघ्यदेहः | 8 13 22 | — 8 |
| 85 | विष्णुर्वन्द्यदेहः | 8 14 54 | — 8 |
| 110 | अम्भो मत्स्यदेहः | 8 15 40 | — 8 |
| 130 | अर्घं मत्स्यजग्धिः | 8 15 40 | — 9 (वक्रः) |
| 150 | जनमान्यं दधि | 8 15 8 | — 9 |
| 165 | वीर्यभोज्यं दुग्धम् | 8 14 14 | — 9 |
| 175 | मङ्गलं स्याद्दधि | 8 13 35 | — 9 |
| 185 | देवप्रियं दधि | 8 12 48 | — 9 |
| 193 | धेनोः प्राप्यं दुग्धम् | 8 12 9 | — 9 |
| 203 | गुरुपेयं दुग्धम् | 8 11 23 | — 9 |
| 213 | सर्वज्ञस्य दधि | 8 10 47 | — 9 |
| 228 | अग्निनाढ्यं दुग्धम् | 8 10 0 | — 9 |
| 248 | मालाधीनो देहः | 8 9 35 | — 8 (निवृत्तिः) |
| 268 | गवां धनं दोहः | 8 9 43 | — 8 |

---

I. ꣸ D adds : प्रथमपरिवृत्ति-

II. 175. C कन्दळम् for स्याद्दधि 193. ABD धनप्राप्यं; C धेनुप्राप्यं
203. A B वीरपेयं दधि 213. C E संभ्रमः कन्दळः
268. A B D देहः for दोहः

| Days | Vākya | r o ′ | Saṁskāra-varṇa |
|---|---|---|---|
| 293 | दण्डो नृपदेहः | 8 10 38 | — 8 |
| 318 | नरेन्द्रो यदुजः | 8 12 20 | — 8 |
| 348 | तनुमध्यो देहः | 8 15 6 | — 8 |
| 363 | | | (अस्तम्) |
| 378 | कलहो यदुजः | 8 18 31 | — 8 |

( *वाक्यं 19. 'रत्नं' (2) शनेः )

## परिवृत्तिः III

| | | | |
|---|---|---|---|
| 15 | | | (उदयः) |
| 30 | ईशः परदेहः | 8 21 50 | — 8 |
| 60 | धीरो वरदेहः | 8 24 29 | — 8 |
| 85 | क्षोणीशो रजोन्धः | 8 25 56 | — 9 |
| 110 | अवन्ती राजेद्धाः | 8 26 40 | — 9 (वक्रः) |
| 130 | स्थूलाचारो जळः | 8 26 37 | — 9 |
| 150 | लीनान्तरं दुग्धम् | 8 26 3 | — 9 |
| 165 | सानुः शरदग्धः | 8 25 7 | — 9 |
| 175 | क्षीरद्वारं दधि | 8 24 26 | — 9 |
| 185 | स्थूलं गुरु दुग्धम् | 8 23 37 | — 9 |
| 193 | धर्मश्रेष्ठो हेळिः | 8 22 59 | — 9 |
| 203 | वर्ज्यं रात्रौ दधि | 8 22 14 | — 9 |
| 213 | जलपात्रं दुग्धम् | 8 21 38 | — 9 |
| 228 | क्षीणो नरो जळः | 8 20 56 | — 9 |
| 248 | बलो निद्राजळः | 8 20 33 | — 9 (निवृत्तिः) |
| 268 | देवा निद्रां जहुः | 8 20 48 | — 8 |

---

II. 378. C कुलाहो ⊕ D adds: द्वितीयपरिवृत्ति-

III. B रजेद्ध ; D राजेद्धः 110. A B D रजोन्धः ; C राजेद्धः

130. A B स्थलचरो 165. B om. the vākya.

| Days | Vakya | r | o | ' | Samskara-varṇa |
|---|---|---|---|---|---|
| 293 | कविः करदेहः | 8 | 21 | 41 | — 8 |
| 318 | गिरिर्गुरुदेहः | 8 | 23 | 23 | — 8 |
| 348 | प्रियश्चन्द्रदेहः | 8 | 26 | 12 | — 8 |
| 363 | | | | | ( अस्तम् ) |
| 378 | अम्भोधरो दिस्तुः | 8 | 29 | 40 | — 7 |

( ४ वाक्यं 19. 'गानं' (3) शनेः )

## परिवृत्तिः IV

| | | | | | |
|---|---|---|---|---|---|
| 15 | | | | | ( उदयः ) |
| 30 | समरो निधिदः | 9 | 2 | 57 | — 8 |
| 60 | बली मानेद्धाजिः | 9 | 5 | 33 | — 8 |
| 85 | नानार्थो निधिदः | 9 | 7 | 0 | — 8 |
| 110 | अश्वः सन्नद्धाजिः | 9 | 7 | 40 | — 8 ( वक्रः ) |
| 130 | फलेप्सुर्निधिदः | 9 | 7 | 32 | — 8 |
| 150 | कामतनुर्धुन्धुः | 9 | 6 | 51 | — 9 |
| 165 | दाशो मीनधीद्धः | 9 | 5 | 58 | — 9 |
| 175 | शक्या मानर्द्धार्द्धम् | 9 | 5 | 15 | — 9 |
| 185 | सरस्वान् स्निग्धाब्धिः | 9 | 4 | 27 | — 9 |
| 193 | देवो गानधीद्धः | 9 | 3 | 48 | — 9 |
| 203 | वनगा नीळाब्धिः | 9 | 3 | 4 | — 9 |
| 213 | हरिद्रो निधीद्धः | 9 | 2 | 28 | — 9 |
| 228 | कामुको निधीद्धः | 9 | 1 | 51 | — 9 |

III. 293. A B E रविः for कविः 378. A B अम्बा धरजा हि
 ४ D adds : तृतीयपरिवृत्ति-

IV. 150. A B C D धूळः for धुन्धुः 165. A B धीदः
 203. A E निळार्धिः 213. A B D E हारि रवेद्धोऽब्धिः (D रवेद्धू ळिः)

| *Days* | *Vākya* | *r o ,* | *Saṁskāra-varṇa* |
|---|---|---|---|
| 248 | तारको निधीद्धः | 9. 1 26 | — 9 (निवृत्तिः) |
| 268 | पावको निधिदः | 9 1 41 | — 8 |
| 293 | विश्वश्रीर्निधिदः | 9 2 44 | — 8 |
| 318 | तरवो निधिदः | 9 4 26 | — 8 |
| 348 | कुरुः सन्नद्धासिः | 9 7 21 | — 7 |
| 363 | | | (अस्तम्) |
| 378 | रामो नयधीस्थः | 9 10 52 | — 7 |

( ↑ वाक्यं 19. 'वनं' (4) शनेः )

परिवृत्तिः V

| | | | |
|---|---|---|---|
| 15 | | | (उदयः) |
| 30 | दानवो युद्धेप्सुः | 9 14 8 | — 7 |
| 60 | गर्वितः केळिस्थः | 9 16 43 | — 7 |
| 85 | जनो जयधीस्थः | 9 18 8 | — 7 |
| 110 | स्तवार्हो युद्धेप्सुः | 9 18 46 | — 7 (वक्रः) |
| 130 | जलहयोऽब्धिस्थः | 9 18 38 | — 7 |
| 150 | बाणार्थी पुळिन्दः | 9 17 53 | — 8 |
| 165 | दाशस्तोयाधीहः | 9 16 58 | — 8 |
| 175 | भूपतिर्युद्धार्हः | 9 16 14 | — 8 |
| 185 | मूर्खात्मा पुळिन्दः | 9 15 25 | — 8 |
| 193 | सत्त्ववान् पुळिन्दः | 9 14 47 | — 8 |

---

IV. 318. A B D E तनुर्वनाळिजः 378. C D नयधीच्छुः

↑ D adds : चतुर्थपरिवृत्ति-

V. 130. A B C E हेयो 165. A E दानी सोऽयं धीदः. B om. the vākya.

185. C. मूर्खश्रीः ; E मुखारोः. C E काळाहिः for पुळिन्दः

| Days | Vākya | r | o | , | Saṁskāra-varṇa |
|---|---|---|---|---|---|
| 203 | मीनो भोज्योऽब्धिज: | 9 | 14 | 5 | — 8 |
| 213 | हर: श्लाघ्योऽर्धेन्दु: | 9 | 13 | 28 | — 8 |
| 228 | कामारिर्युद्धार्ह: | 9 | 12 | 51 | — 8 |
| 248 | बाल: प्रियोऽन्धस: | 9 | 12 | 33 | — 7 (निवृत्ति:) |
| 268 | कामारिर्व्याळस्थ: | 9 | 12 | 51 | — 7 |
| 293 | क्षोणी लोकधित्सु: | 9 | 13 | 56 | — 7 |
| 318 | विश्वमान्या धृति: | 9 | 15 | 44 | — 6 |
| 348 | जम्भहा युद्धार्त: | 9 | 18 | 48 | — 6 |
| 363 | | | | | (अस्तम् ) |
| 378 | विकाराद्रिळित: | 9 | 22 | 14 | — 6 |

( ४ वाक्यं 19. 'मुनि:' (5) शने: )

## परिवृत्ति: VI

| Days | Vākya | r | o | , | Saṁskāra-varṇa |
|---|---|---|---|---|---|
| 15 | | | | | (उदय:) |
| 30 | शूली मन्त्रधाम | 9 | 25 | 35 | — 5 |
| 60 | जनो जारोऽधम: | 9 | 28 | 8 | — 5 |
| 85 | गङ्गाधारो धर्म: | 9 | 29 | 33 | — 5 |
| 110 | धर्माधारो धर्म: | 9 | 29 | 59 | — 5 |
| 130 | नानाज्ञाननियम: | 10 | 0 | 0 | — 5 (वक्र:) |
| 150 | गण्यो धीरधर्म: | 9 | 29 | 13 | — 5 |
| 165 | तुष्टिर्दारधर्म: | 9 | 28 | 16 | — 5 |
| 175 | नाग: संरुद्धाश: | 9 | 27 | 30 | — 5 |
| 185 | अम्भस्तरळोर्मि | 9 | 26 | 40 | — 5 |

---

V. 228. A B कामी नि for कामारि:
293. A B E लोकाद्धि स: 378. A B व्रीळार्त:
४ D adds पञ्चमपरिवृत्ति-
VI. 60. E जरा धाम 85. C D धरो 150. C D गर्ह्यो. C धीराधम:

| Days | Vakya | r | o | , | Samskara-varna |
|---|---|---|---|---|---|
| 193 | रत्नं चोरधृतम् | 9 | 26 | 2 | — 6 |
| 203 | नरः स्मरेद्धार्तिः | 9 | 25 | 20 | — 6 |
| 213 | शुभोऽध्वरो धातुः | 9 | 24 | 45 | — 6 |
| 228 | धनी विप्रोऽधीतः | 9 | 24 | 9 | — 6 |
| 248 | लक्ष्मीगुरुर्धूर्तः | 9 | 23 | 53 | — 6 (निवृत्तिः) |
| 268 | श्रेयान्भूरिधर्मः | 9 | 24 | 12 | — 5 |
| 293 | क्रूरस्मरो धवः | 9 | 25 | 22 | — 4 |
| 318 | स्तुत्यः सारधीभृत् | 9 | 27 | 16 | — 4 |
| 348 | इन्द्रो नानानयभृत् | 10 | 0 | 20 | — 4 |
| 363 | | | | | (अस्तम्) |
| 378 | सोमलग्नो नाकभृत् | 10 | 3 | 57 | — 4 |

( ८ वाक्यं 19. 'तनुः' (6) शनेः )

## परिवृत्तिः VII

| Days | Vakya | r | o | , | Samskara-varna |
|---|---|---|---|---|---|
| 15 | | | | | (उदयः) |
| 30 | जयस्थानं निकुम्भः | 10 | 7 | 18 | — 4 |
| 60 | क्षोणीधनो नकुलः | 10 | 9 | 56 | — 3 |
| 85 | शूरपूज्यो नाकुलिः | 10 | 11 | 25 | — 3 |
| 110 | सोमाद्या यज्ञः किल | 10 | 11 | 57 | — 3 (वक्रः) |
| 130 | देवपूज्यो नियोगः | 10 | 11 | 48 | — 3 |
| 150 | यानयोग्यो नकुलः | 10 | 11 | 1 | — 3 |

---

VI. 193. C चोरोद्धृतम् 228. A B E वीरोद्धतः 248. A B C धूतः for धूर्तः 318. C तुल्यसारो धवः 348. E नयवित् 378. C नाकवित् ८ D adds षष्ठपरिवृत्ति-

VII. 30. C स्थानेऽग्निकुम्भः 60. C धनेन कूलः 85. C नकुलः 110. A om. the vakya. D सोमवन्द्यो. B C यज्ञकूलः; D कुलः 150. A B D E धन for यान

| *Days* | *Vākya* | *r* | *o* | *,* | *Saṁskāra-varṇa* |
|---|---|---|---|---|---|
| 165 | दमेद्धो ज्ञानगोगः | 10 | 9 | 58 | — 3 |
| 175 | चापधनो नकुलः | 10 | 9 | 16 | — 3 |
| 185 | श्रेष्ठो दीनानां त्यागः | 10 | 8 | 22 | — 3 |
| 193 | सत्त्वस्थो ज्ञानयोगः | 10 | 7 | 47 | — 3 |
| 203 | दमस्तनूनां योगः | 10 | 6 | 58 | — 3 |
| 213 | धरातनुर्नृपालः | 10 | 6 | 29 | — 3 |
| 228 | रमेशो ज्ञानयोगः | 10 | 5 | 52 | — 3 |
| 248 | अम्भो मीनेनाकुलम् | 10 | 5 | 40 | — 3 (निवृत्तिः) |
| 268 | ऌनस्तेनो नृपालः | 10 | 6 | 3 | — 3 |
| 293 | शुक्रस्थो ज्ञानयोगः | 10 | 7 | 25 | — 3 |
| 318 | राज्याधीनो नृपालः | 10 | 9 | 12 | — 3 |
| 348 | पुरारिः पिनाकास्त्रः | 10 | 12 | 21 | — 2 |
| 363 | | | | | (अस्तम्) |
| 378 | वनितेडद्यं नूपुरम् | 10 | 16 | 4 | — 2 |

(ꙮ वाक्यं 19. ¥ 'सूनुः' (7) शनेः)

## परिवृत्तिः VIII

| | | | | | |
|---|---|---|---|---|---|
| 15 | | | | | (उदयः) |
| 30 | खड्गधृष्टो नृपाढ्यः | 10 | 19 | 32 | — 1 |
| 60 | लोकश्रेष्ठो नाकेड्यः | 10 | 22 | 13 | — 1 |
| 85 | रेवा गुरुनीपाढ्या | 10 | 23 | 42 | + 1 |

VII. 165. A B D E दामेद्धो
193. A om. the vakya. 228. A B D E रामेशो. ABE नून for ज्ञान 293 and 318. E om. these two vākyas. ꙮ D adds सप्तमपरिवृत्ति- ¥ E सेना

VIII. 30. A B C नृपाय ; E नृपार्च्यः 60. C D नृपेड्यः
85. C D नृपाढ्या

| *Days* | *Vākya* | *r o ,* | *Saṁskāra-varṇa* |
|---|---|---|---|
| 110 | नारी वस्त्रनिष्काढ्या | 10 24 20 | + 1 (वक्रः) |
| 130 | योग्या विप्रा नृपार्च्याः | 10 24 11 | + 1 |
| 150 | श्रेष्ठाम्बरा नायिका | 10 23 22 | + 1 |
| 165 | श्रेष्ठा स्त्री रत्नकल्पा | 10 22 22 | + 1 |
| 175 | शूलीपरा निष्पापाः | 10 21 35 | + 1 |
| 185 | लोभिनरा निष्कृपाः | 10 20 43 | + 1 |
| 193 | मानिनी रत्नकल्पा | 10 20 5 | + 1 |
| 203 | क्रूरधियो निष्कृपाः | 10 19 22 | + 1 |
| 213 | भवजाया नित्येड्या | 10 18 44 | + 1 |
| 228 | पुण्यजयिनः पूज्याः | 10 18 11 | + 1 |
| 248 | होमसेव्योऽग्निः पुष्टैः | 10 17 58 | + 1 (निवृत्तिः)) |
| 268 | श्रेष्ठा जाया नित्याढ्या | 10 18 22 | + 1 |
| 293 | अश्वाधिका नायकाः | 10 19 40 | + 1 |
| 318 | हेलाढ्या राज्ञः कन्या | 10 21 38 | + 1 |
| 348 | क्षोणीभृद्रत्नपुष्टैः | 10 24 56 | + 1 |
| 363 | | | ( अस्तम् ) |
| 378 | भवदारा नित्येड्याः | 10 28 44 | + 1 |

( ९ वाक्यं 19. 'दानं' (8) शनैः )

## परिवृत्तिः IX

| | | | |
|---|---|---|---|
| 15 | | | (उदयः) |
| 30 | सेव्या रत्नकल्पा स्त्री | 11 2 17 | + 2 |

---

VIII. 175. A B शार्ङ्गिपरा 185. E लोभान्नराः 193. A E रत्नाकल्पा 213. B From 213 in this set to 213 in the next, 9th, set left out. 228. A E कोपदायिनः for पुण्यजयिनः 348. C D E वरान्नपुष्टा (D पुष्टया) ९ D adds : अष्टमपरिवृत्ति-

| *Days* | *Vākya* | *r* | *o* | *,* | *Saṁskāra-varṇa* |
|---|---|---|---|---|---|
| 60 | गानमग्नः कपाली | 11 | 5 | 3 | + 3 |
| 85 | तुङ्गस्तनी काम्याङ्गी | 11 | 6 | 36 | + 3 |
| 110 | दयासन्ना कपिला | 11 | 7 | 18 | + 3 (वक्रः) |
| 130 | नन्द्यसूनुः कपिला | 11 | 7 | 10 | + 3 |
| 150 | वरतनुः काम्याङ्गी | 11 | 6 | 24 | + 3 |
| 165 | शूरात्मानः कुपालाः | 11 | 5 | 25 | + 3 |
| 175 | शूलभृन्नाव्ययोगी | 11 | 4 | 35 | + 3 |
| 185 | गर्भेऽङ्गनोत्कृष्टाङ्गी | 11 | 3 | 43 | + 3 |
| 193 | प्रज्ञाब्धिर्नित्ययोगी | 11 | 3 | 2 | + 3 |
| 203 | पुरारिर्नित्ययोगी | 11 | 2 | 21 | + 3 |
| 213 | शोभापन्नः कपाली | 11 | 1 | 45 | + 3 |
| 228 | जानकी निष्काढ्याङ्गी | 11 | 1 | 8 | + 3 |
| 248 | शशिनो नित्यकला | 11 | 0 | 55 | + 3 (निवृत्तिः) |
| 268 | श्रेष्ठा यज्ञयोग्या गौः | 11 | 1 | 22 | + 3 |
| 293 | सगरो नृपस्त्यागी | 11 | 2 | 37 | + 3 |
| 318 | कुम्भभूर्नित्ययज्वा | 11 | 4 | 41 | + 4 |
| 348 | यज्ञहीनः पापवान् | 11 | 8 | 1 | + 4 |
| 363 | | | | | (अस्तम्) |
| 378 | शशी कन्याकल्पवान् | 11 | 11 | 55 | + 7 |

( △वाक्यं 19. 'धनं' (9) शनेः )

## परिवृत्तिः X

| | | | | | |
|---|---|---|---|---|---|
| 15 | | | | | (उदयः) |
| 30 | संगी शय्यायां युवा | 11 | 15 | 37 | + 4 |

IX. 165. C शूलात्मानः 193. A E प्रज्ञाङ्गो (E प्रज्ञोऽङ्गं) नृपस्त्यागी
213. A शोभा यज्ञकपाले 228. C निष्काम्याङ्गी
318. E कुम्भभृन्नित्य 348. A B यज्वा for यज्ञ
△ D adds : नवमपरिवृत्ति-

| *Days* | *Vakya* | *r* | *o* | *,* | *Saṁskāra-varṇa* |
|---|---|---|---|---|---|
| 60 | हरजुष्टा कम्पभूः [१] | 11 | 18 | 28 | + 4 |
| 85 | सेनानी राज्यकर्ता | 11 | 20 | 7 | + 6 |
| 110 | रणे नराः कुपिताः | 11 | 20 | 52 | + 6 (वक्रः) |
| 130 | धवैर्नारीढ्या कुचैः | 11 | 20 | 49 | + 6 |
| 150 | गानज्ञाः स्त्रियः कान्ताः | 11 | 20 | 3 | + 6 |
| 165 | भग्नाधिः पुण्यकर्ता | 11 | 19 | 14 | + 6 |
| 175 | सत्योदयः पूज्यते | 11 | 18 | 17 | + 6 |
| 185 | शूरः सात्यकिः कृती | 11 | 17 | 25 | + 6 |
| 193 | भास्वान् तापस्य कर्ता | 11 | 16 | 44 | + 6 |
| 203 | अन्नं तोयैः पच्यते | 11 | 16 | 0 | + 6 |
| 213 | पुरुर्मान्यो ययातेः | 11 | 15 | 21 | + 6 |
| 228 | विवस्वान् पयःपाता | 11 | 14 | 44 | + 6 |
| 248 | जरावान् कम्पकर्ता | 11 | 14 | 28 | + 6 (निवृत्तिः) |
| 268 | श्रीमान् भाग्यस्य कर्ता | 11 | 14 | 52 | + 6 |
| 293 | श्रान्त्या तोयं पीयते | 11 | 16 | 12 | + 6 |
| 318 | तोयदे पयःकणाः | 11 | 18 | 16 | + 6 |
| 348 | शीलाढ्याः स्त्रियः कान्ते | 10 | 21 | 35 | + 6 |
| 363 | | | | | ( अस्तम् ) |
| 378 | धीगशराः कपोताः | 11 | 25 | 39 | + 6 |

( *वाक्यं 19. 'नित्यं' (10) शनेः )

---

X. [१] कम्पभूः is Kanchi in the Madras State.
130. C धवेन रम्या कुन्ती 213. A B D E मरुन्मान्यो
293. A B D E श्रुत्या 318. A B तोयदैः. A gap for पयः
For कणाः, A B read केतोः and D कर्ता
* D adds : दशमपरिवृत्ति-

## परिवृत्तिः XI

| *Days* | *Vakya* | *r* | *o* | *'* | *Samskara-varṇa* |
|---|---|---|---|---|---|
| 15 | | | | | ( उदयः ) |
| 30 | तरळाः स्त्रियः कान्ताः | 11 | 29 | 26 | + 6 |
| 60 | चक्रं रथे | 0 | 2 | 26 | + 7 |
| 85 | जिनोऽवासाः | 0 | 4 | 8 | + 7 |
| 110 | यज्ञे शंसा | 0 | 5 | 1 | + 7 (वक्रः) |
| 130 | इनः शासी | 0 | 5 | 0 | + 7 |
| 150 | वेद्या वेदाः | 0 | 4 | 14 | + 8 |
| 165 | नारी गृहे | 0 | 3 | 20 | + 8 |
| 175 | त्यागी राजा | 0 | 2 | 31 | + 8 |
| 185 | कवयोऽर्हाः | 0 | 1 | 41 | + 8 |
| 193 | धीर्मुदे | 0 | 0 | 59 | + 8 |
| 203 | श्रीर्यदौ | 0 | 0 | 12 | + 8 |
| 213 | सत्ते धीराः कार्यार्हाः | 11 | 29 | 27 | + 8 |
| 228 | गणहाराः कृपार्हाः | 11 | 28 | 53 | + 8 |
| 248 | चण्डी हरकायस्था | 11 | 28 | 36 | + 7 (निवृत्तिः) |
| 268 | धर्मदाराः कार्यार्थाः | 11 | 28 | 59 | + 7 |
| 293 | तोष्योऽर्थी | 0 | 0 | 16 | + 7 |
| 318 | कुरो रथी | 0 | 2 | 21 | + 7 |
| 348 | गर्वः शीथोः | 0 | 5 | 43 | + 7 |
| 363 | | | | | ( अस्तम् ) |
| 378 | गौर्विधीस्थाः | 0 | 9 | 43 | + 7 |

( ϭ वाक्यं 19. 'पुण्यं' (11) शनेः )

---

XI. 30. A B D कान्ते; E gap for न्ताः    85. A B हीनावासाः
130. A B नूनं मार्थीः; E जनः शासी    185. A B कवयो हि
193. A B C D धर्मदे    293. A B तुष्टयर्थो; C तुष्टोऽर्थी; D तोष्यार्थी
318. A B D E क्रूररथी    378. A B D गर्मा धीस्थाः
ϭ D adds: एकादशपरिवृत्ति-

## परिवृत्तिः XII

| Days | Vākya | r o , | Saṁskāra-varṇa |
|---|---|---|---|
| 15 | | | (उदयः) |
| 30 | चण्डा लङ्कास्थाः | 0 13 36 | + 7 |
| 60 | बभुस्तोयदाः | 0 16 43 | + 8 |
| 85 | अम्बा दयार्हा | 0 18 30 | + 8 |
| 110 | भोगधीर्याजी | 0 19 34 | + 8 (वक्रः) |
| 130 | धरा धन्यार्हा | 0 19 29 | + 8 |
| 150 | प्रमदा काळा | 0 18 52 | + 9 |
| 165 | क्षोणी सूर्येद्धा | 0 17 56 | + 9 |
| 175 | नम्याः सत्येद्धाः | 0 17 10 | + 9 |
| 185 | हेयश्चौर्यधीः | 0 16 18 | + 9 |
| 193 | चण्डात्मा काळी | 0 15 36 | + 9 |
| 203 | रणविद्योद्धा | 0 14 52 | + 9 |
| 213 | श्लाघ्या विद्या धीः | 0 14 13 | + 9 |
| 228 | तुरगी योद्धा | 0 13 26 | + 9 |
| 248 | मुनिः श्लाघ्यधीः | 0 13 5 | + 9 (निवृत्तिः) |
| 268 | रुद्रा लोकार्हाः | 0 13 22 | + 8 |
| 293 | साम्बो भयहा | 0 14 37 | + 8 |
| 318 | शिवास्तोयदाः | 0 16 45 | + 8 |
| 348 | शिवा धूपार्हा | 0 19 45 | + 8 |
| 363 | | | (अस्तम्) |
| 378 | वने वराहाः | 0 24 4 | + 8 |

( ℵ वाक्यं 19 ♂ 'प्रियं' (12) शनेः )

---

XII. 130. C धान्यार्हा 150. A काळम् 165. C E क्षोणीष्सुर्योद्धा
193. A B D काळा 213. C श्लाघ्यो वीर्यधीः
228. E om. the vākya. 293. C D E हला (D साम्बो; E हारा) भूपार्हाः 318. C E धीगाः for शिवाः
ℵ D adds : द्वादशपरिवृत्ति- ♂ D प्रियः

## परिवृत्तिः XIII

| Days | Vākya | r | o | , | Saṁskāra-varṇa |
|---|---|---|---|---|---|
| 15 | | | | | (उदयः) |
| 30 | सोमाः सत्रार्हाः | 0 | 27 | 57 | + 8 |
| 60 | जनाः कनकार्हाः | 1 | 1 | 8 | + 8 |
| 85 | हीनाङ्गना कुब्जा | 1 | 3 | 8 | + 8 |
| 110 | भग्ना वनकुन्दाः | 1 | 4 | 4 | + 8 |
| 130 | धनुर्भग्नं युद्धे | 1 | 4 | 9 | + 9 (वक्रः) |
| 150 | शूलिलग्ना काळी | 1 | 3 | 35 | + 9 |
| 165 | शिवाप्राज्ञा काळी | 1 | 2 | 45 | + 9 |
| 175 | धार्मिका नयेद्धाः | 1 | 1 | 59 | + 9 |
| 185 | सेनापो नियोद्धा | 1 | 1 | 7 | + 9 |
| 193 | वीरो नूनं योद्धा | 1 | 0 | 24 | + 9 |
| 203 | शूली धीरधीः | 0 | 29 | 35 | + 9 |
| 213 | लक्ष्मीर्हरीद्धा | 0 | 28 | 53 | + 9 |
| 228 | स्तनौ हारेद्धौ | 0 | 28 | 6 | + 9 |
| 248 | रम्भा सुरधीः | 0 | 27 | 42 | + 9 (निवृत्तिः) |
| 268 | सोमसुद्राजा | 0 | 27 | 57 | + 8 |
| 293 | सेना धीरार्हा | 0 | 29 | 7 | + 8 |
| 318 | मुनयो नित्यार्हाः | 1 | 1 | 5 | + 8 |
| 348 | गुरुर्विनयार्थी | 1 | 4 | 23 | + 7 |
| 363 | | | | | (अस्तम्) |
| 378 | पुत्रहीनाः पार्थाः | 1 | 8 | 21 | + 7 |

( ॰ वाक्यं 19. ॰॰ 'गोपः' (13) शनेः )

---

XIII. 110. C वने कन्दाः 150. A B C D शूललग्ना
165. C शुभ and E शिव for शिवा. C E प्रज्ञा
175. A B सिंहिका and D सात्त्विका for धार्मिका
203. A B D E शूल for शूली 378. A B पार्थिवाः
॰ D adds: त्रयोदशपरिवृत्ति- ॰॰ D लोकः for गोपः

## परिवृत्तिः XIV

| Days | Vākya | r o , | Saṁskāra-varṇa |
|---|---|---|---|
| 15 | | | (उदयः) |
| 30 | सत्यप्रियाः पार्थाः | 1 12 17 | + 7 |
| 60 | कुलमुख्याः पार्थाः | 1 15 31 | + 7 |
| 85 | तीव्राः सूर्यपादाः | 1 17 26 | + 6 |
| 110 | अम्बुदाः कार्यार्थाः | 1 18 30 | + 7 |
| 130 | कुविन्दाः पापार्हाः | 1 18 41 | + 8 निवृत्तिः |
| 150 | प्रयाजाः पुण्यदाः | 1 18 12 | + 8 |
| 165 | रुद्राः सेव्यपादाः | 1 17 22 | + 8 |
| 175 | अद्भुताः पयोदाः | 1 16 40 | + 8 |
| 185 | श्रमणी कृपार्हा | 1 15 52 | + 8 |
| 193 | जनो मान्यो याजी | 1 15 8 | + 8 |
| 203 | सत्यं भृत्या कुब्जा | 1 14 17 | + 8 |
| 213 | बाला श्लाघ्या कुब्जा | 1 13 33 | + 8 |
| 228 | शशाः प्रायः कुब्जाः | 1 12 55 | + 8 |
| 248 | शङ्करः कपर्दी | 1 12 15 | + 8 |
| 268 | शौरेरच्या कथा | 1 12 25 | + 7 |
| 293 | हरेः श्लाघ्या कथा | 1 13 28 | + 7 |
| 318 | वीरमान्याः पार्थाः | 1 15 24 | + 7 |
| 348 | स्थूलहयाः पार्थाः | 1 18 37 | + 7 |
| 363 | | | (अस्तम्) |

---

XIV. 60. A B D E कुलमान्यः पन्थाः (E पार्थाः)
110. C अङ्गदः कार्यार्थी 130. C पयोर्हाः
213. A B बालाः श्लाघ्याः कुजाः (? ब्जाः). E वालि-for बाला
228. C E गणप्रिया कुब्जा 268. D सौरच्या कथा

२.४५ (इत्युपविश्य[1] जनान्तिकम्[2])

भो ! णिम्मक्खिआ दाणि महुपिण्डिआ[3] संवुत्ता । [भोः ! निर्मक्षिकेदानीं मधुपिण्डिका संवृत्ता ।]

४८ **राजा**--भगवति !

लज्जा विलासो विनयं मृदुत्वं
कान्तिर्वपुःश्रीर्नवयौवनं च ।
अत्यर्थमुद्रिक्ततयानुरागात्[4]
स्थिता [5]न्वहंपूर्विकयेव[6] देव्याम्[7] ॥ ३ ॥

३.१ **साङ्कृ**—सदृशमुक्तं देवेन । गुणेषु[8] [गुणो][9] रज्यते ।

**वास**—(आत्मगतम्) दियुणं दाणि ळज्जापइदुं संवुत्तो । [द्विगुणमिदानीं लज्जयितुं संवृत्तः ।]

(प्रविश्य वीणाहस्तः काञ्चुकीयः)

५ **काञ्चुकीयः**—अहो नु खलु—

अनवेक्ष्य मम श्रमोपतापं
यतमानोऽपि यियासयाहमत्र ।
न सहेऽचपलं पदानि कर्तुं
जरया श्रृङ्खलयेव बद्धपादः[10] ॥ ४ ॥

४.१ (उपसृत्य)

जयतु देवः ! आनीतेयं वीणा ।

**राजा**--अये घोषवती ! रत्नमेव हि रत्नं भजते । (वीणां मूर्च्छयति ।)

**काञ्चु**--मुहूर्तं तावदस्याः स्फटिकवेदिकायाः समीपे उपविशेयम् ।

५ (परिक्रम्योपविशति ।)

---

1. A उपविशति ।
2. D E om. the word.
3. D E corrupt : D उहुपण्डिआ ; E उहुपस्सिआ
4. D गं
5. D E न्य for न्व
6. D यैव
7. A E देव्याः ; D देव्या
8. D गुण and E गुणव, after which they break off and commence again with VII. 9.1, two leaves being lost.
9. A word like this is necessary here.
10. Vatsa. om. the verse.

४.६ **राजा**--प्रतिगृह्यतां वीणा ।

**साङ्कृ**--[1]प्रकृत्यैव सापत्रपा खल्वियम् । सन्दर्शनं च प्रथमम् । तस्मादशक्ता देवी गातुम् ।[2] तन्त्रीस्पर्शनादेव विद्यारम्भः कृतो भविष्यति ।

**वास**--(आत्मगतम्) अदीव परित्ताइद ह्मि भअवदीए । [अतीव परित्रातास्मि भगवत्या ।]

११ **राजा**--भगवति ! किमिदानीं पुनः कार्यम् ।

**साङ्कृ**--देव ! त्वयैव तावत् प्रारम्भानुरूपा काचिदाशीर्गातव्या ।[3]

**राजा**--यदभिप्रेतं भगवत्यै ।

१४ (वीणां वादयन् गायति ।)

विष्णोर्जयत्यरुणताम्रतलः स पादो
  यः प्रोज्झितः सललितं त्रिजगत् प्रमातुम् ।
क्वापि प्रविष्टरुचिराङ्गुलिराबभासे
  वैडूर्यसङ्क्रम इवाम्बरसागरस्य ॥ ५ ॥

५.१ **साङ्कृ**--अद्य खलु अस्माभिः श्रोत्रफलमुपलब्धम् ।

**काञ्च**[4]--वीणाणं[5] च । [वीणानां च ।]

**वास**--अमिअपरिसेओ विअ सुदीणम् । [अमृतपरिषेक इव श्रुतीनाम् ।]

**काञ्चु**--[आत्मगतम्] पुनर्नवीभूतेव मे श्रुतिः । (आकाशे) अहो तु खलु राज्ञो गीतवादित्रश्रवणसन्तर्पितं शनैः शनैः मामाक्रामति ।

६ **वास**--अम्मो ! ण पारेमि उच्छसन्तं मे सरीरं धारेदुं । [अहो ! न पारयाम्युच्छ्वसन्मे शरीरं धारयितुम् ।]

---

1. A has before this the words सन्दर्शनं प्रत्येवम् which seem to be deleted, for a deletion mark is seen at the end. (Normally, however, we expect the deletion mark both at the beginning and at the end if a passage is deleted.)
2. A गायितुम्
3. A गायितव्यम्
4. A actually reads काञ्चु
5. A वाणाणं

५.८ साङ्कृ---अहो तु खलु सा कन्या धन्या या ईदृशं भर्तारमवाप्स्यति ।

काञ्च---( विदूषकं विलोक्य ) ळद्धा कञ्ञा धञ्ञतमा भविस्सिदि ।
[ लब्धा कन्या धन्यतमा भविष्यति । ]

विदू—भोदि ! ळद्धो पुरुसो अ । [ भवति ! लब्धः पुरुषश्च । ]

वास—( सस्मितं मुखमपनयति । )

१३ राजा---( पुनर्गायति )—

चतुरुदधिजलाम्बरां वरां
फलभरपिञ्जरशालिमालिनीम् ।
चिरमवतु नृपो हताहितां
हिमगिरिविन्ध्यपयोधरां धराम् ॥ ६ ॥

६.१ साङ्कृ---अहो वैचित्र्यम् !

राजा—( आत्मगतम् ) इयं हि---

यथा यथा पश्यति भीतभीतं
दृष्ट्या स्वपक्ष्मान्तरगूढया माम् ।
तथा तथा मे क्षरतीव धैर्यं
विलीयमानं मदनानलेन ॥ ७ ॥

७.१ विदू--भो ! अञ्ञं पि गाआहि । [ भो ! अन्यदपि गाय । ]

राजा—सखे ! तथा । ( गायति )—

परस्परविवृद्धहार्दरससम्पदार्द्रात्मनां
प्रवृद्धनवयौवनोदयविदाहिनां कामिनाम् ।
मनोरथमहारथं मदनसारथिः सादरं
समागमपुरीं परां नयतु कान्तरत्युत्सवाम् ॥ ८ ॥

८.१ साङ्कृ—साधु । तथैवास्तु ।

राजा—देवि ! चित्तमत्र देयम् । ( मध्यमग्रामं भावयित्वा ) देवि ! प्रारम्भमात्रमत्र कर्तव्यम् ।

**साङ्कृ**—वत्से! गृह्यतां वीणा।

**वास**—अंब! तह। (वीणां गृहीत्वा) अंब! किं दाणि करिस्सं। [अम्ब! तथा। अम्ब! किमिदानीं करिष्ये।]

**साङ्कृ**—देवेन यत्समुद्दिष्टम्।

**वास**—का गई। [का गतिः।]

(शनैः शनैर्वादयति।)

**राजा**—अहो आश्चर्यम्! भगवति! अतीव खलु मेधाविनी देवी। अस्या हि—

**रुचिराङ्गुलिपल्लवाः स्पृशन्तो**
**मधुधाराः कपिलाः क्रमेण तन्त्रीः।**[1]
**भ्रमतां निवहन्ति तुण्डलीलां**
**बकुलापिञ्जरपञ्जरे शुकानाम्॥ ९॥**

**विदू**—भो! अण्णेहि कदिवएहि[2] दिअसेहि[3] भोदो[4] वि देवी[5] आआरिआ[6] भविस्सिदि[7] त्ति तक्केमि। [भो! अन्यैः कतिपयैर्दिवसैः भवतोऽपि देवी आचार्या भविष्यतीति तर्कयामि।]

**राजा**—एवमेव मे मनोरथः।

**वास**—अंब![8] अळं दाणिं एत्तेण[9]। [अम्ब! अलमिदानीमेतेन।]

**राजा**—देवि![10] तथा।

**वास**—हञ्जे![11] इमं दाव गह्ण। [हञ्जे! इमां तावद् गृहाण।]

---

1. A तन्त्रीम्
2. D E again commence here, but in the E edn. this portion is mistakenly put as the beginning of the Act.
3. E corrupt, दि अं। स हि
4. D E भवदो
5. D E om. वि देवी
6. D E आआय्या, which the E. Edr. emends to आआय्यो and gives the chāyā आकार्यो
7. D भविस्सि; E भविस्सदि
8. A. om. the address.
9. D E दाणीं (E. Edr.'s emendation दानीं) एदेण।
10. D E om. the address.
11. D corrupt, भहरज्जु for हञ्जे

९.८ **काञ्च**—भट्टिणि! तह। [भट्टिणि! तथा।]

(वीणां गृहीत्वा उपविशति।)[1]

**साङ्कृ**—(आत्मगतम्)[2] गमनविघ्नं देवस्य कुर्याम्।[3] (प्रकाशम्) **को नु** खल्वतीव मुखरः?

**राजा**--भगवति! मत्तविलासो नाम अयं डिण्डिको राज्ञा[4] मे दत्तः।

**साङ्कृ**—किमयं[5] जानाति?

**राजा**--किञ्चिद्विडम्बयति।[6]

**साङ्कृ**--किं नु क्रियते देव्याः।

**विदू**--भअवदि! किं विळम्बेमि? [भगवति! किं विडम्बयामि?]

**साङ्कृ**[7]-- मत्तविलासो नाम ननु त्वम्।

**विदू**—होदु।[8] एसो दाव मत्तो। [भवतु। एष तावन्मत्तः।]

(नृत्यति।)

**राजा**-- (आत्मगतम्) अहो नु[9] खल्वकृत्रिममस्या रूपलावण्यम्! कुतः--

**गात्रेषु देव्या निपतत्यतुल्यं[10]**
**श्रीमत्सु[11] दृष्टिर्मम यत्र यत्र।**
**ततस्ततोऽसौ महता श्रमेण**
**श्लेषावबद्धेव[12] पुनर्व्यपैति[13] ॥ १० ॥**

---

1. A (तथा कृत्वोपविशति।)
2. D om. (आत्मगतम्). E adds here wrongly देव which the E Edr. emends to देवी
3. Mss. A D E read कुर्यात्।
4. A om. the word.
5. A किमिय्यं
6. The E Edr. emends this as विलम्बति। In D E the next two speeches are omitted by haplograhy.
7. साङ्कृ om. in E
8. A om. होदु।
9. A D तु for नु
10. E Edr. emends ल्यं to ल्य-
11. D श्रीमत्स; E श्रीमन्ध
12. Vatsa. श्लेषानुबद्धेव
13. E पुनर्ह्यपेति which its Edr. emends to पुनर्ह्यपैति।

१०. १ **वास**—(आत्मगतम्) इच्छामि अहं[1] तं जणं[2] पेक्खिदुं। एदेण उण मं[3] पेक्खन्तेण विग्घीअदि।[4] [इच्छाम्यहं तं जनं प्रेक्षितुम्। एतेन पुनर्मां प्रेक्षमाणेन विघ्नायते।]

**विदू**—भोदि![5] एसो दाव मज्झममत्तो। [भवति! एष तावन्मध्यममत्तः।]

(नृत्यति।)

**साङ्कृ**—अहो सविशेषता![6]

**विदू**—(आत्मगतम्)[7] अहं खु णच्चामि। देवीए उण चक्खू[8] [9]तत्तहोदो मुह य्येव[10] णच्चइ।[11] [अहं खलु नृत्यामि। देव्याः पुनश्चक्षुस्तत्रभवतो मुख एव नृत्यति।]

**राजा**—(आत्मगतम्)

**मुखनेत्रशिखाद्विजाधरभ्रूजघनोरुस्तनमध्यपाणिपद्मयः[12]।**
**कथितेक्षणहासत[13]श्च देव्या रतिमिश्रा[14] क्षरतीव कामधारा॥११॥**

११. १ **विदू**—भोदि! एसो दाव अदिमत्तो। [भवति! एष तावदतिमत्तः।]

(नृत्यति।)

**काश्च**—(आत्मगतम्)[15] भट्टिदारिआ ण तस्सिं चित्तं देदि।[16] [भर्तृदारिका न तस्मिंश्चित्तं ददाति।]

**विदू**—भअवदि! किमण्णं[17] णच्चामि? [भगवति! किमन्यन्नृत्यामि?]

**साङ्कृ**—अलमलम्।[18] परिश्रमः स्यात्।

---

1. D E om. अहं; also E reads इच्छम्मि for इच्छामि
2. D E णं omitted.
3. D E om. मं
4. E विग्घीअदि for which its Edr. gives the chāyā विहन्यते।
5. E होदि
6. E षम् for षता
7. D E om. (आत्मगतम्)
8. D broken: प...for चक्खू त
9. E अत्त for तत्त
10. D E om. य्येव
11. D corrupt, णच्चिअबइ।
12. D वर्ज्यः, E वर्जम् and Vatsa. पद्मस्य (?) for पद्मयः
13. D E leave out त
14. Vatsa. मात्रा for मिश्रा
15. A om. the stage direction.
16. D E देहि (corrupt).
17. D ण्णं
18. A om. one अलं

राजा—वक्त्रं[1] देव्या रुधिरमधर[2]च्छायया ताम्रमेतद्
बिल्वापाण्डुस्तनयुगमिदं यौवनश्रीसमुद्रम् ।
श्रोणीं चैनां स्मररथनिभां मेखलारावतूर्यां
कुर्यां स्वैरं प्रणयसुखसंभोगवश्यां कदा नु ॥ १२ ॥

१२.१ साङ्कृ—वत्से ! नन्वस्य परिश्रमः[3] पूजयितव्यः ।[4]

वास—भद्द ! गह्ण इदं अङ्गुळीअअं । [भद्र ! गृहाणेदमङ्गुलीयकम् ।]

( ददाति । )

विदू—भोदि ! इदं गह्णिअ सदं मे मोदआणं देहि । [भवति ! इदं गृहीत्वा शतं मे मोदकानां देहि । ]

६ राजा—अनर्घत्वादस्य [5]लक्षैरपि मोदकानाम् आनृण्यं[6] गन्तुमशक्यं देव्या ।

( गृहीत्वा आमुञ्चति । )

वास—हद्धि ! किण्णाम मए किदं । [हा धिक् ! किं नाम मया कृतम् ।]

राजा—(आत्मगतम्) आलिङ्गितमिवाहमनेन देव्या संवृत्तः ।

१० काश्व—(जनान्तिकम्) भट्टिदारिए ! एदस्सिं आमुत्त य्येव भट्टिणो सरीरं कण्टइदं संवुत्तं । [भर्तृदारिके ! एतस्मिन् आमुक्त एव भर्तुः शरीरं कण्टकितं संवृत्तम् । ]

१२ वास—(सस्मितम्) तुवं किञ्चिण्ण पेक्खसि ।[7] [त्वं किञ्चिन्न प्रेक्षसे । ]

राजा—वक्त्रं नामयति प्रपश्यति मयि प्रह्वं[8] तु मामीक्षते
सोच्छ्वासं प्रविजृम्भते विहसति प्रेक्षां क्षणं नेक्षते ।
नीवीसंयमनं मुहुः प्रकुरुते चेटीं ब्रवीत्यस्फुटं
देवी मय्यनुरागिणी ध्रुवम् अहो ! दैवं ममाद्योन्मुखम् ॥१३॥

---

1. E व्यक्तं
2. D E folios lost containing the portion from here to भो संपत्त ह्म (VII. 13.14) towards the end of the Act.
3. A मं
4. A व्यम्
5. A पक्षै
6. A corrupt : reads तपाण्यं for आनृण्यं
7. A दि for सि
8. A corrupt, प्रमं

१३. **साङ्कृ**—देव ! स्वकीयमेवैतद् भवनम् । निर्यन्त्रणमत्र निर्वर्तितव्यम् । महान् शिष्याचार्य[1]सम्बन्धो नाम ।

**राजा**—मय्यपि देव्यास्तथैव ।

**साङ्कृ**—किमत्र वक्तव्यम् ।

**राजा**—आर्य मारक !

**विदू**—एसो खु मीणमज्झगदो बको विअ एको णिद्दाअदि । [एष खलु मीनमध्यगतो बक इवैको निद्रायते ।]

**राजा**—मारक ! मारक ! ( प्रबोधयति । )

**काञ्चु**—( उत्थाय ) जयतु देवः ।

**राजा**—नीयतां देवी ।

**काञ्चु**—देव ! तथा ।

**साङ्कृ**—वत्से ! उत्तिष्ठेदानीम् ।

**वास**—अं । अंब ! तह । [हम् । अम्ब ! तथा ।]

( उत्थाय सर्वे परिक्रामन्ति । )

**राजा**—भगवति ! गच्छाम्यहमिदानीम् ।

**साङ्कृ**—गम्यतां पुनर्दर्शनाय ।

**काञ्चु**—देवि ! गम्यतामिदानीम् ।

( निष्क्रान्ता वासवदत्ता साङ्कृत्यायन्या काञ्चुकिना काञ्चनमालया सह । )

**विदू**—( परिक्रम्य ) भो ! समत्तो पुडमंको । [भोः ! समाप्तः प्रथमाङ्कः ।]

**राजा**—सखे ! मुखं च ।

( परिक्रामतः । )

**विदू**—भो ! किं दाणि कत्तव्वं ? [भोः ! किमिदानीं कर्तव्यम् ?]

**राजा**—परश्वः[2] प्रभृति प्रतिमुखादिसन्धियुक्तान् द्वितीयादीनङ्कान् प्रारभामहे ।

**विदू**—भो ! णिग्गद ह्म कञ्जाउरादो । [भोः ! निर्गताः स्मः कन्यापुरात् ।]

---

1. A reads only शिष्याचार

2. A reads प्रश्वः for परश्वः

१४. राजा—देव्याहं सुविदग्धभावललितप्रोद्दारिरूपश्रिया
सत्यंकारवशादिवात्तहृदयो रत्युत्सवप्राप्तये ।
गात्रैः शून्यतमैः कथञ्चिदवशो गच्छामि कामातुरः
स्वत्यागादपवर्तमानवचनश्वासप्रमाणेक्षितैः ॥ १४ ॥

विदू—अळं सन्दावेण । अङ्कारूडा तत्तहोदी । [अलं सन्तापेन । अङ्कारूढा तत्रभवती ।]

(उभौ परिक्रामतः ।)

राजा—आकारतश्च मन्त्रभेदो भवति । तस्मादस्या मदनग्लान्याः प्रच्छादनोपायश्चिन्तयितव्यः ।

विदू—सुट्ठु[1] अत्तभवदा उत्तं । अदीव धुत्तो पज्जोदो भरदरोहओ अ । [सुष्ठ्वत्रभवतोक्तम् । अतीव धूर्तः प्रद्योतो भरतरोहकश्च ।]

राजा—सखे ! किमस्ति काचिदस्यां नगर्यां अन्यत्रातिसक्ता स्वैरिणी ।

विदू—अत्थि मूळ्ळावणिअसत्ता णम्मदा णाम बन्धई । [अस्ति मूल्यापणिकसक्ता नर्मदा नाम बन्धकी ।]

राजा—वयस्य ! कीदृशी सा ?

विदू—जा साअन्तणोवट्ठाणे पेक्खिअ सूणफळअसम त्ति[2] तुए उत्ता । [या सायन्तनोपस्थाने प्रेक्ष्य सूनाफलकसमेति त्वया उक्ता ।]

राजा—आ सखे ! तदैवेयं [3]मया विज्ञाता[4] अनुरक्तपुरुषयानया[5] भवितव्यमिति ।

विदू—भो[6] ! किं दाणि पुण ताए कय्यं[7] ? [भोः ! किमिदानीं पुनस्तया कार्यम् ?]

---

1. A corrput ; reads सुम्मु
2. A समं ति
3. D E comence here again after the long break.
4. E Edr. emends to विज्ञातम् ।
5. D अनुरक्त....तयानया ; E अनुरक्त ....तया
6. D E om. भो
7. D E कज्जं

१४. १८ [1]**राजा**—सखे! सुभगा[2] सा। ततस्तां[3] कामयमान इव प्रदेयकं प्रेषयिष्यामि। त्वया पुनः प्रकाशीकर्तव्यम्।

**विदू**—भो! तह।[4] एसो य्येव मे पज्जोदसेवओवाओ। [भोः! तथा। एष एव मे प्रद्योतसेवकोपायः।]

**राजा**—भवत्वेतत्।

२३ **विदू**—भो! पवेसओ[5] वि समत्तो। [भोः! प्रवेशकोऽपि समाप्तः।]

**राजा**—सम्यगुक्तं भवता।

**विदू**—भो! संपत्त ह्म आवासम्। [भोः! सम्प्राप्तौ स्व आवासम्।]

२६ **राजा**—वयस्य![6]

सन्दर्शनं प्रत्यहमङ्गनानां
पुंसामतिस्नेहविवृद्धिहेतुः।
लब्धं च तद्द्वारमचिन्त्यमस्मात्
प्राप्तामिवाहं दयितामवैमि ॥ १५ ॥

१५. १ (निष्क्रान्तौ।)

॥ इति सप्तमोऽङ्कः ॥[7]

---

1. Five speeches from here lost in E.
2. D adds अ
3. D ततस्तस्यां
4. A om. तह
5. A उभयप्पवेसओ
6. A om. वयस्य!
7. E is not available for the rest of the work.

# अष्टमोऽङ्कः

( ततः प्रविशति वासवदत्ता । )

**वासवदत्ता**—कहिं णु हु दाव गच्छइ कञ्चणमाळा । [कुत्र नु खलु तावद् गच्छति काञ्चनमाला । ]

( प्रविश्य काञ्चनमाला )

**काञ्चनमाला**—जेदु भट्टिदारिआ । पेसिदा मए णळमूळा भट्टिणो सआसं[1] घोसवदीए तन्तीओ[2] जोजेदुं[3] । [जयतु भर्तृदारिका । प्रेषिता मया नड्मूला भर्तुः सकाशं घोषवत्यास्तन्त्रीर्योजयितुम् । ]

**वास**—हञ्जे ! अदीव सो जणो वामो । ता इदं पि[4] ण करिस्सिदि त्ति तक्केमि । [हञ्जे ! अतीव स जनो वामः । तदिदमपि न करिष्यतीति तर्कयामि । ]

**काञ्च**—कहं विअ ? [कथमिव ?]

**वास**—हद्धि ! किं णाम मए भणिदं[5] । [हा धिक् ! किं नाम मया भणितम् । ]

**काञ्च**—भणादु भणादु भट्टिदारिआ । [भणतु भणतु भर्तृदारिका । ]

**वास**—हञ्जे[6] ! ण किञ्चि । [हञ्जे ! न किञ्चित् । ]

**काञ्च**—मम पाणेहि साविदा सि[7] जदि ण भणिस्सिदि । [मम प्राणैः शापितासि यदि न भणिष्यति । ]

**वास**—अहो आआसो ! हञ्जे ! सच्चं[8] ण पारेमि वत्तुं । [अहो आयासः ! हञ्जे ! सत्यं न पारयामि वक्तुम् । ]

**काञ्च**—अदो एव्व[9] सोदुं पि[10] ण पारेमि । भट्टिदारिए ! किं अत्ताणं पि ळज्जावीअदि ?[11] [अत एव श्रोतुमपि न पारयामि । भर्तृदारिके ! किमात्मानमपि लज्जयति ? ]

---

1. D समीवं
2. D तन्ति
3. A जोजेदू; D जोएदुं
4. D कदाइ एदं वि for ता एदं पि
5. D मन्तिदं
6. D om. हञ्जे
7. A om. सि
8. A सच्चं
9. A om. एव्व
10. D om. पि
11. D ळज्जसि

०.२३ **वास**—हञ्जे! सो जणो रत्तीए आअच्छिअ[1] पच्चूस य्येव पळाअदि। अदो खु मए उत्तं 'अदीव सो जणो[2] वामो' त्ति। [हञ्जे! स जनो रात्रावागत्य प्रत्यूष एव पलायते। अतः खलु मयोक्तम् 'अतीव सो जनो वाम' इति।]

**काञ्च**—भट्टिदारिए! सच्चं खु भट्टा वामो। [भर्तृदारिके! सत्यं खलु भर्ता वामः।]

२९ **वास**—हञ्जे! किं मम तुवं एक्कं पारेसि कादुं? [हञ्जे! किं मम त्वमेकं पारयसि कर्तुम्?]

**काञ्च**—ण एक्कं, सदं पि। [न एकं, शतमपि।]

**वास**—जइ एव्वं अज्ज तुवं[3] रत्तीए सुप्पन्ती विअ जग्गाहि। [यद्येवम् अद्य त्वं रात्रौ स्वपन्तीव जागृहि।]

**काञ्च**—तेण किं? [तेन किम्?]

३५ **वास**—तं जणं आअदमत्तं एव[4] उत्तरीएण गह्णिअ मं[5] बोहेहि। [तं जनम् आगतमात्रमेव उत्तरीयेण गृहीत्वा मां बोधय।]

**काञ्च**—तदा भट्टिदारिआए किं करिस्सिदि?[6] [तदा भर्तृदारिकया किं करिष्यते?]

**वास**—अहं तं गह्णिअ दार[7]त्थंभे एक्का[8]वळीए बन्धिस्सं। [अहं तं गृहीत्वा द्वारस्तम्भे एकावल्या बन्धयिष्यामि।]

४१ **काञ्च**—किं पारइस्सिसि[9] कादुं? [किं पारयिष्यसि कर्तुम्?]

**वास**—किं मं अबळ त्ति[10] मञ्ञासि?[11] [किं मामबलेति मन्यसे?]

४३ **काञ्च**—को[12] वा एवं मञ्ञेदि।[13] पज्जोदधीदा वि[14] एदं कादुं असमत्थ त्ति तक्केमि। [को वा एवं मन्यते। प्रद्योतदुहितापि एतत्कर्तुमसमर्थेति तर्कयामि।]

---

1. D आअमिअ
2. A om. जणो
3. D om. अज्ज तुवं
4. A त्त य्येव
5. D om. मं
6. D स्सिदि त्ति।
7. D दारु
8. A leaves space for एक्का
9. D पारेसि
10. D असमत्थ त्ति
11. D तक्केसि
12. D का
13. D मन्तेदि
14. D adds एव्वं कहं वि

०.४५ **वास**—किं णिमित्तं ? [किं निमित्तम् ?]

**काञ्च**—उवदेसकाळे जं[1] भट्टारं पेक्खिअ सञ्जादविहत्थदाए घोसवदिं उज्झिअ आआसं[1a] वादीअदि[2]। [उपदेशकाले यद् भर्त्तारं प्रेक्ष्य सञ्जातविहस्ततया घोषवतीम् उज्झित्वा आकाशो वाद्यते।]

४९ **वास**—(निःश्वस्य[3]) किं करिस्सामि[4] मन्दभाआ। तं जणं पेक्खिअ उम्मत्ता विअ अत्तणो ण प्पभवामि। [किं करिष्ये मन्दभागा। तं जनं प्रेक्ष्य उन्मत्तेव आत्मनो न प्रभवामि।]

**काञ्च**—ण केवळं[5] भट्टिदारिआ एव अत्तणो ण प्पभविस्सिदि।[6] सो वि णाम तादिसो अणेअविज्जागंभीरहिअओ वि[7] भट्टिदारिअं पेक्खिअ कसणपक्खचंदो विअ पडिदिवसं तणुगत्तो[8] होदि। [न केवलं भर्तृदारिकैवात्मनो न प्रभविष्यति। सोऽपि नाम तादृशः अनेकविद्यागम्भीरहृदयोऽपि भर्तृदारिकां प्रेक्ष्य कृष्णपक्षचन्द्र इव प्रतिदिवसं तनुगात्रो भवति।]

५७ **वास**—किं तुवं मण्णिमित्तं ति तक्केसि ? [किं त्वं मन्निमित्तमिति तर्कयसि ?]

**काञ्च**—को[9] एत्थ सन्देहो। [कोऽत्र सन्देहः।]

**वास**—[10]हञ्जे ! [11] अस्सरिअणिमित्तं[12] सोओ किं ण भवे। [हञ्जे ! ऐश्वर्यनिमित्तं शोकः किं न भवेत्।]

**काञ्च**—भट्टिदारिए ! ण तादिसा महापुरुसा अस्सरिअणिमित्तं सन्तप्पन्ति। [भर्तृदारिके ! न तादृशा महापुरुषा ऐश्वर्यनिमित्तं सन्तपन्ति।]

६३ **वास**—सच्चं तुए[13] मन्तिदं। जइ सो एव्वं भवे[14] किस्स मे हिअआदो णावक्कमदि ?[15] [सत्यं त्वया मन्त्रितम्। यदि स एवं भवेत् कस्मान्मे हृदयान्नापक्रमति ?]

---

1. A दं   1a. A आएसं
2. D वट्टीअदि।
3. A निर्वर्ण्य
4. D करोमि
5. A om. ण केवळं
6. D पभवदि
7. D om. वि
8. A तणु for तणुगत्तो
9. A किं for को
10. A om. हञ्जे
11. A ऐ for अ
12. D त्त-
13. A has an extra म after तु and reads तु मए
14. A जइ एव एसो ण भवे
15. A ण परिक्कमिस्सिदि।

०.६५ **काञ्च**—सुट्ठु भणिदं[1] भट्टिदारिआए। [सुष्ठु भणितं भर्तृदारिकया।]

(प्रविश्य चेटी)

**चेटी**—जेदु भट्टिदा[2]रिआ। महन्तं खु मए एकं अब्भुदअं सुदं। [जयतु भर्तृदारिका। महत् खलु मयैकमभ्युदयं श्रुतम्।]

**वास**—(सादरं) हञ्जे! किं किं। [हञ्जे! किं किम्।]

७० **चेटी**—भट्टिणा किळ वच्छराएण णम्मदा कामीअदि। [भर्त्रा किल वत्सराजेन नर्मदा काम्यते।]

**काञ्च**—सन्तं सन्तं पापं! [शान्तं शान्तं पापम्!]

**वास**—कुदो दे सुदं? [कुतस्त्वया श्रुतम्?]

**चेटी**—भट्टिणो चामरग्गाहिआए पदुमादेवीए। [भर्तुश्चामरग्राहिकायाः पद्मादेव्याः।]

७६ **वास**—(आत्मगतम्)[3] सुणिअ णिच्चअं सक्कं कादुं।[4] (प्रकाशं) हञ्जे! ताए किं उत्तं? [श्रुत्वा निश्चयः शक्यः कर्तुम्। (प्रकाशम्) हञ्जे! तया किमुक्तम्?]

**चेटी**—"भट्टिणा किळ वच्छराएण एकदा भट्टिणोवट्ठाणे[5] णम्मदा दिट्ठा।" ["भर्त्रा किल वत्सराजेनैकदा भर्तुरुपस्थाने नर्मदा दृष्टा।"]

८० **काञ्च**—भट्टिदारिए! किं एदेण अळिअवादेण। [भर्तृदारिके! किमेतेनालीकवादेन।]

**वास**—हञ्जे! तुह्णीआ होहि! तदो तदो। [हञ्जे! तूष्णीका भव। ततस्ततः।]

८३ **चेटी**—"तदो किळ वच्छराएण अणेएहि उवाअणेहि पत्थिअमाणाए ताए मूल्ळावणिआणुराअदाए ण पडिपण्णं।" ["ततः किल वत्सराजेन अनेकैरुपायनैः प्रार्थ्यमानया तया मूल्यापणिकानुरागतया न प्रतिपन्नम्।"]

---

1. D दिट्ठ (? ट्ठं) for भणिदं
2. Ms. D breaks off here abruptly.
3. The two words वास—(आत्मगतम्) are not available in A.
4. A actually reads णिच्चअक्कोदुं। for णिच्चयं सक्कं कादुं।
5. A reads णोवच्छाणे

०.८६ **वास**—[ आत्मगतम् ] ताए एवं दाव जुत्तं किदं। (प्रकाशम् ) तदो तदो। [ तया एवं तावद्युक्तं कृतम्। (प्रकाशम् ) ततस्ततः। ]

**चेटी**—"तदो तं वुत्तन्तं अह्माणं भट्टिणो[1] चारेहि[2] से सरीरविआरेहि जाणिअ तस्स णम्मदा दिण्णा[3] किळ।" ["ततस्तं वृत्तान्तं अस्माकं भर्तुश्चारैः अस्य शरीरविकारेभ्यो ज्ञात्वा तस्य नर्मदा दत्ता किल।"]

९१ **वास**—तदो तदो। [ ततस्ततः। ]

**चेटी**—"तदो 'उब्बंधिअ मरिस्सं' ति उत्ते भट्टिणा वच्छराएण सअं गह्णिअ 'इमाए जीवन्तीए असक्कं अत्तणो वसं[4] णेदुं' ति[5] भणिअ मादुगिहं एव णम्मदा पेसिदा।" ["ततः 'उद्बध्य मरिष्यामि' इत्युक्ते भर्त्रा वत्सराजेन स्वयं गृहीत्वा 'अस्यां जीवन्त्यामशक्यमात्मनो वशं नेतुम्' इति भणित्वा मातृगृहमेव नर्मदा प्रेषिता।"]

९७ **वास**—अहो! अह्माणं दाणि णम्मदा उवज्झाइणी संवुत्ता। हञ्जे! गच्छ तुवं। ताए पूआ णेदव्व त्ति अय्यस्स माठरस्स मन्तेहि। [अहो! अस्माकमिदानीं नर्मदा उपाध्यायिनी संवृत्ता। हञ्जे! गच्छ त्वम्। तस्या पूजा नेतव्येति आर्यस्य माठरस्य मन्त्रय। ]

१०१ **चेटी**—भट्टिदारिए! तह। [भर्तृदारिके! तथा। ]

(निष्क्रान्ता।)

**वास**—हञ्जे कञ्चणमाळे! अण्णाए णिमित्तं सन्तप्पन्तं जणं अण्णहा भणादि भवदी।[6] [हञ्जे काञ्चनमाले! अन्यस्या निमित्तं सन्तपन्तं जनम् अन्यथा भणति भवती। ]

१०६ **काञ्च**—भट्टिदारिए! ण तण्णिमित्तं सन्तप्पदि भट्टा। किं राअहंसो काकिं कामअदि। [भर्तृदारिके! न तन्निमित्तं सन्तपति भर्ता। किं राजहंसः काकीं कामयते। ]

१०९ **वास**—असाहारणं पदिं कामेमि त्ति मए जाणिदं। सव्व[7]साहारणो कामिदो। [असाधारणं पतिं कामय इति मया ज्ञातम्। सर्वसाधारणः कामितः। ]

---

1. A भट्टिणा
2. A reads पारेहि for चारेहि
3. A reads किण्ण for दिण्णा
4. A reads वासं
5. A णेदु त्ति
6. A defective ; reads भवं
7. A reads सघ for सव्व

**काञ्च**—भट्टिदारिए ! असाहरण य्येव पदी कामिदो । [भर्तृदारिके ! असाधारण एव पतिः कामितः ।]

**वास**—( अश्रूणि परिमृज्य ) अत्थि णाम अदिमूढदा । तादिसस्स वि जणस्स हिअअप्पवेसो दीअइ[1] । [अस्ति नाम अतिमूढता ! तादृशस्यापि जनस्य हृदय-प्रवेशो दीयते ।]

**काञ्च**—भट्टिदारिए ! मा अकारणे सन्तप्पाहि । [भर्तृदारिके ! मा अकारणे सन्तप ।]

**वास**—हञ्जे ! तुवं पदुमादेवी[2] सच्चं मंतेदि त्ति तक्केसि ? [हञ्जे ! त्वं पद्मादेवी सत्यं मन्त्रयते इति तर्कयसि ?]

**काञ्च**—अजुत्तं ताए असच्चदा । तह वि असच्चं विअ दीसइ । जइ णाम सच्चं भवे णिस्संसअं भट्टिणो विआरन्तरेण किद त्ति तक्केमि । [अयुक्तं तस्या असत्यता । तथापि असत्यमिव दृश्यते । यदि नाम सत्यं भवेत् निस्संशयं भर्तु-र्विकारान्तरेण कृतमिति तर्कयामि ।]

**वास**—समत्था तुवं ववदेससदाणि[3] वत्तुं । [समर्था त्वं व्यपदेशशतानि वक्तुम् ।]

**काञ्च**—भट्टिदारिए ! जइ एवं ण पच्चाअअसि,[4] णिच्चं खु भट्टा भअवदीए संकिच्चाअणीए पुत्तो विअ उवअरीअदि, तेण सा[5] णिस्संसअं जाणादि । तं एव पुच्छामो । [भर्तृदारिके ! यद्येवं न प्रत्याययसि, नित्यं खलु भर्ता भगवत्या साङ्कृत्यायन्या पुत्र इवोपचर्यते, तेन सा निस्संशयं जानाति । तामेव पृच्छावः ।]

**वास**—( सासूयम् ) पुच्छ तुवं । किं मम एदिणा । [पृच्छ त्वम् । किं ममैतेन ।]

( ततः प्रविशति साङ्कृत्यायनी । )

**साङ्कृ**—अहो तु खलु मदनसन्तापस्य बलम् । सम्प्रति हि—

स्नेहैकतानहृदयः क्षितिपात्मजायां
वत्सेश्वरः स्मरशरव्रणितान्तरात्मा ।
सन्धार्यते च्युतधृतिः स मया कथञ्चिद्
रज्ज्वेन्द्रकेतुरिव मारुतवेगघूर्णः ॥ १ ॥

( परिक्रामति ।)

1. A actually reads दीसइ
2. A has an extra विअ here.
3. A reads साणि omitting द
4. A reads only पच्चअसि
5. A has ता for सा

१.२ (वासवदत्ता मदनावस्थां नाटयति ।)

**काञ्च**—(आत्मगतम्) अदीव खु भट्टिदारिआ सन्तप्पदि । केण वि विणोदेण णं विणोदइस्सं । (प्रकाशम्) भट्टिदारिए ! काळो दाणि उय्याणं गन्तुं । [अतीव खलु भर्तृदारिका सन्तपति । केनापि विनोदेन तां विनोदयिष्यामि । (प्रकाशम्) भर्तृदारिके ! काल इदानीमुद्यानं गन्तुम् ।]

**वास**—एहि ! गच्छामो । [एहि । गच्छावः ।]

८ (उभे उत्थाय परिक्रामतः ।)

**साङ्कृ**—यावद् वासवदत्ता [1]आगच्छति तावदतिमुक्तलतामण्डपे उपविशामि ।[2] (उपविश्य) केन खलूपायेनाहमद्य वत्सराजदत्तमिदं लेखं वासवदत्तायै दद्याम् ।

**काञ्च**—भट्टिदारिए ! पविट्ठ ह्म उय्याणं । [भर्तृदारिके ! प्रविष्टौ स्व उद्यानम् ।]

१३ **साङ्कृ**—अये ! आगता वासवदत्ता । अये वपुःश्रीः ! अस्या हि—

नेत्रे कर्णान्तदीर्घे द्युतिनिधिरधरभ्रूसनाथं ललाटं
बाहू स्रस्तांसमूलौ स्तननतमुदरं नाभिरुद्रोमराजिः ।
पादौ श्रोणीभरार्तौ विलसितकलिला हंसखेला गतिश्रीः
दृष्ट्वैनां मन्मथार्ता युवतिरपि भवेत् का कथा वत्सराजे ॥२॥

२.१ **काञ्च**—भट्टिदारिए ! एसा भअवदी माहवीळदामण्डवे उपविट्ठा । [भर्तृदारिके ! एषा भगवती माधवीलतामण्डपे उपविष्टा ।]

**वास**—हञ्जे ! आअच्छ । तहिं एव गच्छामो । [हञ्जे ! आगच्छ । तत्रैव गच्छावः ।]

(उभे परिक्रामतः ।)

६ **साङ्कृ**—किञ्चित् सामर्षेव[3] दृश्यते देवी । परिहासान्तरेण तावदस्यास्तापमपनयामि ।

---

1. A om. आ
2. A Hapl. om. of this word.
3. A reads सामर्ष एव

17

**वास**—( उपसृत्य ) अंब ! वन्दामि । [ अम्ब ! वन्दे । ]

**साङ्कृ**—स्वागतमस्मद्राजवध्वै । उपविश ।

**वास**—अंब ! को एसो असुमराओ णाम ? [ अम्ब ! क एषोऽस्मद्राजो नाम ? ]

**साङ्कृ**—वत्से ! सञ्जयस्य पिता ।

**वास**—संजयो णाम को ? [ सञ्जयो नाम कः ? ]

**साङ्कृ**—यस्मै त्वा दित्सुर्महासेनः ।

**वास**—णत्थि मे पुरुसेण पओअणं । [ नास्ति मे पुरुषेण प्रयोजनम् । ]

**साङ्कृ**—वत्से ! किमर्थम् ?

**वास**—पुरुसा णाम अदीव अणाआरा । [ पुरुषा नाम अतीव अनाचाराः । ]

**काञ्च**—[ आत्मगतम् ] किं णु खु सो भट्टिदारिआए हिअआदो अवक्कमति । [ किं नु खलु स भर्तृदारिकाया हृदयादपक्रामति । ]

**साङ्कृ**—वत्से ! तथापि प्राप्तकालत्वादनिच्छयापि त्वां दास्यति महासेनः ।

**वास**—ण मं तादो अणिच्छआ देदि । [ न मां तातोऽनिच्छया ददाति । ]

**साङ्कृ**—यदि कदाचिद् दद्यात् ?

**वास**—उब्बन्धिअ मरिस्सं । [ उद्बध्य मरिष्यामि । ]

**काञ्च**—भट्टिदारिए ! मा अमङ्गळं भणाहि । वरिससदं जीवदु भट्टिदारिआ ! [ भर्तृदारिके ! मा अमङ्गलं भण । वर्षशतं जीवतु भर्तृदारिका ! ]

**साङ्कृ**—वत्से ! कदाचिदप्यचिन्तनीयमेवैतत् । पश्य—

**पतिविद्वेषिताः कन्या मृताः प्रेतपतेः किल ।**
**रथाश्वतर्यो जायन्ते खट्वाङ्गानि भवन्ति वा ॥ ३ ॥**

**काञ्च**—भट्टिदारिए ! हं अदीव अजुत्तं[1] दम् । [ भर्तृदारिके ! हम् अतीवायुक्त-मिदम् । ]

---

1. A reads अजुतं

**वास**—अंब ! किं पुण मए कादव्वं ? [अम्ब ! किं पुनर्मया कर्तव्यम् ?]

**साङ्कृ**—वत्से ! अनुरूपो भर्ता कामयितव्यः ।

**वास**—णत्थि तादिसो । [नास्ति तादृशः ।]

**काञ्च**—अहं जाणामि । [अहं जानामि ।]

**साङ्कृ**—कथयतु भवती ।

**काञ्च**—भट्टा वच्छराओ । [भर्ता वत्सराजः ।]

**साङ्कृ**—साधु दृष्टं काञ्चनमालया । स हि—

कुलोद्भवः सकलकलागमान्तगः
प्रियंवदश्चतुरतमो जगत्प्रियः ।
समासतः सुभगतमो विलासवान्
युवा मृदुः सकलमहीशिखामणिः[1] ॥ ४ ॥

**वास**—अहं तं ण पारेमि कामेदुं । [अहं तं न पारयामि कामयितुम् ।]

**साङ्कृ**—किं स बद्ध इति ।

**वास**—अंब ! किं सो बद्धो ? [अम्ब ! किं स बद्धः ?]

**साङ्कृ**—अथ किम् ।

**वास**—किं णिमित्तं । [किन्निमित्तम् ।]

**साङ्कृ**—त्वद्धेतोः ।

**वास**—हद्धि ! मण्णिमित्तं अय्यउत्तो बद्धो ! [हा धिक् ! मन्निमित्तमार्यपुत्रो बद्धः !]

( मोहमुपगता । )

**साङ्कृ**—अहो स्नेहौदार्यम् !

**काञ्च**—हद्धि ! भट्टिदारिआ रोदिति । [हा धिक् ! भर्तृदारिका रोदिति ।]

---

1. Vatsa. reads the verse with the transposition of some words :

कुलोद्भवः सुभगतमो विलासवान्
युवा मृदुः सकलकलागमान्तगः ।
प्रियंवदश्चतुरतमो जगत्प्रियः
समासतः सकलमहीशिखामणिः ॥

४. ११ **साङ्कृ**—भद्रे ! आपस्तावत् ।

**काञ्च**—भअवदि ! तह । (निष्क्रम्य, प्रविश्य) इदमुदअं । [भगवति ! तथा । (निष्क्रम्य प्रविश्य) इदमुदकम् । ]

**साङ्कृ**[1]--(वासवदत्ताया मुखमवसिच्य) वत्से ! समाश्वसिहि समाश्वसिहि ।

१५ **वास**—(प्रत्यागत्य)[2] अय्यउत्त ! [आर्यपुत्र !]

**काञ्च**—दिट्ठिआ पच्चाअदप्पाणा भट्टिदारिआ । [दिष्टया प्रत्यागतप्राणा भर्तृदारिका । ]

**साङ्कृ**—भद्रे ! तूष्णीं भव ।

१९ **वास**—[प्रलपति] किं णिमित्तं रत्तीए इह आअच्छिअ दिवा मं उज्झिअ[3] पळाअसि । किं भणासि—"असिणिद्धा तुवं" ति । अय्यउत्त ! जदा तुवं णळागिरिग्गहणे दिट्ठो तदप्पहुदि अहं देदा संवुत्ता । [किन्निमित्तं रात्राविहागत्य दिवा मामुज्झित्वा पलायसे । किं भणसि—"अस्निग्धा त्वम्" इति । आर्यपुत्र ! यदा त्वं नलागिरिग्रहणे दृष्टस्तदाप्रभृत्यहं त्वदीया संवृत्ता । ]

**साङ्कृ**—जानामि जानामि ।

२५ **काञ्च**—[आत्मगतम्] भिण्णं दाणिं रहस्सं भट्टिदारिआए । अहवा पाणसमा भअवदी । [भिन्नमिदानीं रहस्यं भर्तृदारिकायाः । अथवा प्राणसमा भगवती । ]

**वास**—[पुनः प्रलपति] अय्यउत्त ! किं भणासि—"अहं तव दास" त्ति । न तुवं दासो मे । अहवा दासीपदित्तणेण दासो य्येव तुवं । [आर्यपुत्र ! किं भणसि—"अहं तव दासः" इति । न त्वं दासो मे । अथवा दासीपतित्वेन दास एव त्वम् । ]

३१ **काञ्च**—[आत्मगतम्] हं । पुणो वि तं एव्व सुमरिदं । [हम् ! पुनरपि तदेव स्मृतम् । ]

**वास**—अपेहि । (उत्थाय साङ्कृत्यायनीं विलोक्य) हद्धि ! किं णाम मए भणिदं । अंब ! परित्ताआहि मं । [अपेहि । (उत्थाय साङ्कृत्यायनीं
३५ विलोक्य) हा धिक् ! किं नाम मया भणितम् । अम्ब ! परित्रायस्व माम् । ]

1. Name of speaker left out.
2. A has an extra दा after this.
3. A reads उळी अ

४.३६ (साङ्कृत्यायनीं आलिङ्गति।)

**साङ्कृ**—अलं व्रीडया। आदितः प्रभृत्यैवाहं जानामि।

**वास**—अंब ! कहं णाम देवसमं रञ्जअं[1] अपेक्खन्ती जीविअं धारयिस्सं। [अम्ब ! कथं नाम देवसमं रञ्जकं अपेक्षमाणा जीवितं धारयिष्यामि।]

(रोदिति।)

४१ **साङ्कृ**—वत्से ! मा रोदीः। [2]तदवस्थाजिज्ञासया।

**काञ्च**—पुडम य्येव मए विज्ञादं। भट्टिदारिए ! मा अकारणेण णीलुप्पळपत्तकोमळे इमे हि दिट्ठी आस्सूहि सन्तावेहि। [प्रथममेव मया विज्ञातम्। भर्तृदारिके ! मा अकारणे नीलोत्पलपत्रकोमले इमे हि दृष्टी अश्रुभिः सन्तापय।]

४५ **साङ्कृ**—काञ्चनमाले ! पश्य। सर्वास्ववस्थासु अतिमधुरतां प्रयास्यति सौभाग्यम्। अस्या हि—

**नयनद्वयमश्रुविप्लुतं विगलत्साञ्जनवारि राजते।**
**मणियुग्ममिवासितं द्रुतं रुचिमत्क्षेपणकं क्षरद्रसम्॥ ५॥**

५.१ **वास**—(नेत्रे परिमृज्य) अंब ! तह कहं तुए असच्चं मन्तिदं। [अम्ब ! तथा कथं त्वया असत्यं मन्त्रितम्।]

**साङ्कृ**—अन्यत् सन्धायोक्तम्।

**वास**—(आत्मगतम्) अज्ज वि दाव सावेगं एव्व मे हिअअम्। [अद्यापि तावत् सावेगमेव मे हृदयम्।]

(प्रविश्य वीणाहस्ता चेटी)

७ **चेटी**—जेदु भट्टिदारिआ। इअं वीणा मए आणीदा भट्टिणा सअं जोजिअ[3]-तन्ती। [जयतु भर्तृदारिका। इयं वीणा मयानीता भर्त्रा स्वयं योजिततन्त्री।]

**काञ्च**—अदीव देसकाळे आआदा णळमूळा। णळमूळे ! कहिं अह्माणं भट्टिदारओ ?[4] [अतीव देशकाले आयाता नडमूला। नडमूले ! कुत्रास्माकं
११ भर्तृदारकः ?]

---

1. A is wanting in अं
2. A reads त्व for त
3. A om. अ
4. A reads दारिओ

**कुब्जा**—सो खु गिहे। [स खलु गृहे।]

**वास**—किं तेण उत्तं ? [किं तेनोक्तम् ?]

**कुब्जा**—"सिग्घं तुवं वीणं देहि। अहं अणुपदं आअच्छामि" त्ति। ["शीघ्रं त्वं वीणां देहि। अहमनुपदमागच्छामि" इति।]

**वास**—(आत्मगतम्) इदाणिं मम हिअअं णिव्वुदं[1]। [इदानीं मम हृदयं निर्वृतम्।]

**काश्च**—णळमूळे! गच्छ सिग्घं तुवं। भट्टिदारिआए ह्णाणविधिं सज्जावेहि। [नडमूले! गच्छ शीघ्रं त्वम्। भर्तृदारिकायाः स्नानविधिं सज्जय।]

**कुब्जा**—हळा! तह। [हला! तथा।]

**वास**—हञ्जे! वीणं दाव आणेहि। [हञ्जे! वीणां तावदानय।]

**कुब्जा**—भट्टिदारिए! एसा। [भर्तृदारिके! एषा।]

(दत्त्वा निष्क्रान्ता।)

**वास**—अंब! किं तुए सन्धाअ तह उत्तं ? [अम्ब! किं त्वया सन्धाय तथोक्तम् ?]

**साङ्कृ**—त्वयि निपतितदृष्टिर्मन्मथेनैष बद्ध[2]-
स्तरुणहरिणनेत्रैः स्नेहपाशैरहार्यैः।
विकचकमलषण्डां पद्मिनीं वीक्षमाणो
गजवर इव वन्यः पाशिना पाशवर्यैः॥ ६॥

**वास**—अञ्ञात्थेण सो सिणेहेण बद्धो। [अन्यार्थेन स स्नेहेन बद्धः।]

**काश्च**—[आत्मगतम्] हं। पुणो वि तं एव सुमरदि भट्टिदारिआ। [हम्। पुनरपि तदेव स्मरति भर्तृदारिका।]

**साङ्कृ**—वत्से! कुत्र किल ?

**वास**—णम्मदाए। [नर्मदायाम्।]

---

1. A reads णिच्चुदम्   2. Vatsa. बन्ध

६.६ **साङ्कृ**—न श्रद्धेयमिदम्। कुतः—

**नवार्कभापल्लविताभलोदरे**
**सुगन्धिरेणूत्करकेसरोज्ज्वले।**
**रसामृतज्ञो भ्रमरः सरोरुहे**
**किमर्कपुष्पे प्रणयं करिष्यति॥ ७॥**

७.१ अपिच, तिष्ठतु तावत्।

**नयनोत्पलशेखरे मुखेऽस्मिन्**
**नवताम्राधरपद्मरागदीप्ते।**
**अतिसक्ततया न तस्य दृष्टी-**
**रमते पूर्णशशाङ्कमण्डलेऽपि॥ ८॥**

८.१ **वास**—अधिअदरं पआसं पच्छादेदि।[1] [अधिकतरं प्रकाशं प्रच्छादयति।]

**साङ्कृ**—वत्से! एष पुनस्त्वय्युत्पन्नमदनः। सन्तापस्य प्रच्छादनार्थं वैदेहीपुत्रेणारब्धो व्याजः।

**काञ्च**—भट्टिदारिए! किं मए उत्तं सच्चं जादं। [भर्तृदारिके! किं मया उक्तं सत्यं जातम्।]

६ **साङ्कृ**[2]—कथं नाम त्वमत्र मूढा। तत्रभवान् भरतरोहकस्तावन्मूढः।

**वास**—कहं विअ? [कथमिव?]

**साङ्कृ**—'सदृशाभिजनैर्दशभिर्दारैर्योजयितुमिच्छति महासेनः' इत्युक्ते 'न मे दारैः प्रयोजनम्' इति प्रतिषिद्धवान् किल वत्सराजः।

१० **वास**—तदो तदो। [ततस्ततः।]

**साङ्कृ**—ततः किल मन्दं स्मयमानेन भरतरोहकेणोक्तम्—'जाने, नर्मदायाः प्रतिकूलो मा भूदिति दारा न रोचन्ते देवाय' इति।

**वास**—अदीव अंबा एदस्सिं पक्खवादिणी। [अतीवाम्बा एतस्मिन् पक्ष-
१४ पातिनी।]

---

1. A has सि for ति। 2. A corrupt; reads चमू for साङ्कृ

८.१५ **साङ्कृ**—देवि! कथं नाम तस्मिन् पक्षपातिनी न स्याम्। त्वय्येवमनुरक्तः, मम च प्राणप्रदः।

**वास**—अंब! कहं? तेण दे पाणा दिण्णा! [अम्ब! कथम्! तेन ते प्राणा दत्ताः!]

**साङ्कृ**—कथं न मया पूर्वमेवोक्तं यमुनाह्रदे म्रियमाणाहमुदयनेन परित्रातेति।

**वास**—आआसस्सो भेदि। एवं णाम अह्माणं पि एदेण पाणा दिण्णा। [आयासः शोभते। एवं नामास्माकमप्येतेन प्राणा दत्ताः।]

२१ **काञ्च**—भट्टिदारिए! एवं एव। [भर्तृदारिके! एवमेव।]

**वास**—कहं पुण जाणासि मइ सो साणुराओ त्ति? [कथं पुनर्जानासि मयि सः सानुराग इति?]

**साङ्कृ**—इदं तस्य स्नेहस्य साक्षी।

(स्वहस्तालेख्यं दर्शयति।)

२६ **काञ्च**—(गृहीत्वा प्रसार्य विलोक्य चाक्षराणि) ही ही! एदाणि अक्खराणि आळिहिदाणि। पेक्खदु पेक्खदु भट्टिदारिआ। [ही ही! एतान्यक्षराण्यालिखितानि। पश्यतु पश्यतु भर्तृदारिका।]

(दर्शयति।)

**वास**—(वाचयित्वा निःश्वस्य साश्रुनयना) हञ्जे! अपेहि। एदं बप्फमअं विअ अक्खरं। [हञ्जे! अपेहि। एतद् बाष्पमयमिवाक्षरम्।]

३२ **साङ्कृ**—किमिदानीं प्रत्यक्षीकृतम्।

